योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०७३

त्रिसप्ततितमः सर्गः ७३

श्रीवसिष्ठ उवाच ।

इति राजमुखाच्छ्रुत्वा वेतालः शान्तिमाययौ ।

भावितात्मतया तत्र विचारोचितया धिया ।। १

उपशान्तमना भूत्वा मत्वैकान्तमनिन्दितम् ।

बभूवाविचलध्यानी विस्मृत्य विषमां क्षुधाम् ।। २

एतद्राम मयोक्तं ते वेतालप्रश्नजालकम् ।

एवंक्रमेण चिदणौ तेनेदं संस्थितं जगत् ।। ३

चिदणोः कोशगं विश्वं विचारेण विलीयते ।

कायो वेतालकस्येव शिष्यते यत्पदं तु तत् ।। ४

संहृत्य सर्वतश्चित्तं स्तिमितेनान्तरात्मना ।

स्वभावापतितं कुर्वन्निरिच्छं तिष्ठ शान्तधीः ।। ५

आकाशविशदं कृत्वा मनसैव मनो मुने ।

तिष्ठैकशमशान्तात्मा सर्वत्र समदर्शनः ।। ६

स्थिरबुद्धिरसंमूढो यथाप्राप्तानुवर्तिनः ।

राज्ञो भगीरथस्येव दुःसाध्यमपि सिद्ध्यति ।। ७

संपूर्णशान्तमनसः परितृप्तवृत्ते-

र्नित्यं समे सुखमयात्मनि तिष्ठतोऽन्तः ।

सिद्ध्यन्ति दुर्लभतरा अपि वाञ्छितार्था

गङ्गावतार इव सागरखातवस्तु ।। ८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० वेतालाख्यानं नाम त्रिसप्ततितमः

सर्गः ।। ७३ ।।